श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ षडशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षडशीतितमः सर्गः ॥

## वानररक्षसां युद्धं हनुमता रक्षःसैन्यस्य संहार इन्द्रजितो युद्धायाह्वानं च लक्ष्मणकर्तृकमिन्द्रजितो दर्शनम्

अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः।
परेषामहितं वाक्यमर्थसाधकमब्रवीत् ॥ **6.86.1** ॥

यदेतद् राक्षसानीकं मेघश्यामं विलोक्यते।
एतदायोध्यतां शीघ्रं कपिभिश्च शिलायुधैः ॥ **6.86.2** ॥

तस्यानीकस्य महतो भेदने यत लक्ष्मण।
राक्षसेन्द्रसुतोऽप्यत्र भिन्ने दृश्यो भविष्यति ॥ **6.86.3** ॥

स त्वमिन्द्राशनिप्रख्यैः शरैरवकिरन् परान्।
अभिद्रवाशु यावद् वै नैतत् कर्म समाप्यते ॥ **6.86.4** ॥

जहि वीर दुरात्मानं मायापरमधार्मिकम्।
रावणिं क्रूरकर्माणं सर्वलोकभयावहम् ॥ **6.86.5** ॥

विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः।
ववर्ष शरवर्षेण राक्षसेन्द्रसुतं प्रति ॥ **6.86.6** ॥

ऋक्षाः शाखामृगाश्चैव द्रुमप्रवरयोधिनः।
अभ्यधावन्त सहितास्तदनीकमवस्थितम् ॥ **6.86.7** ॥

राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः।
अभ्यवर्तन्त समरे कपिसैन्यजिघांसवः॥ **6.86.8** ॥

स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिरक्षसाम्।
शब्देन महता लङ्कां नादयन् वै समन्ततः॥ **6.86.9** ॥

शस्त्रैश्च विविधाकारैः शितैर्बाणैश्च पादपैः।
उद्यतैर्गिरिशृङ्गैश्च घोरैराकाशमावृतम्॥ **6.86.10** ॥

राक्षसा वानरेन्द्रेषु विकृताननबाहवः।
निवेशयन्तः शस्त्राणि चक्रुस्ते सुमहद्भयम्॥ **6.86.11** ॥

तथैव सकलैर्वृक्षैर्गिरिशृङ्गैश्च वानराः।
अभिजघ्नुर्निजघ्नुश्च समरे सर्वराक्षसान्॥ **6.86.12** ॥

ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः।
रक्षसां युध्यमानानां महद्भयमजायत॥ **6.86.13** ॥

स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम्।
उदतिष्ठत दुर्धर्षः स कर्मण्यननुष्ठिते॥ **6.86.14** ॥

वृक्षान्धकारान्निर्गत्य जातक्रोधः स रावणिः।
आरुरोह रथं सज्जं पूर्वयुक्तं सुसंयतम्॥ **6.86.15** ॥

स भीमकार्मुकशरः कृष्णाञ्जनचयोपमः।
रक्तास्यनयनो भीमो बभौ मृत्युरिवान्तकः॥ **6.86.16** ॥

दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद् बलम्।
रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम्॥ **6.86.17** ॥

तस्मिंस्तु काले हनुमानरुजत् स दुरासदम्।
धरणीधरसङ्काशो महावृक्षमरिन्दमः॥ **6.86.18** ॥

स राक्षसानां तत् सैन्यं कालाग्निरिव निर्दहन्।
चकार बहुभिर्वृक्षैर्निःसंज्ञं युधि वानरः॥ **6.86.19**॥

विध्वंसयन्तं तरसा दृष्ट्वैव पवनात्मजम्।
राक्षसानां सहस्राणि हनूमन्तमवाकिरन्॥ **6.86.20**॥

शितशूलधराः शूलैरसिभिश्चासिपाणयः।
शक्तिहस्ताश्च शक्तीभिः पट्टिशैः पट्टिशायुधाः॥ **6.86.21**॥

परिघैश्च गदाभिश्च कुन्तैश्च शुभदर्शनैः।
शतशश्च शतघ्नीभिरायसैरपि मुद्गरैः॥ **6.86.22**॥

घोरैः परशुभिश्चैव भिन्दिपालैश्च राक्षसाः।
मुष्टिभिर्वज्रकल्पैश्च तलैरशनिसन्निभैः॥ **6.86.23**॥

अभिजघ्नुः समासाद्य समन्तात् पर्वतोपमम्।
तेषामपि च सङ्क्रुद्धश्चकार कदनं महत्॥ **6.86.24**॥

स ददर्श कपिश्रेष्ठमचलोपममिन्द्रजित्।
सूदमानमसन्त्रस्तममित्रान् पवनात्मजम्॥ **6.86.25**॥

स सारथिमुवाचेदं याहि यत्रैष वानरः।
क्षयमेव हि नः कुर्याद् राक्षसानामुपेक्षितः॥ **6.86.26**॥

इत्युक्तः सारथिस्तेन ययौ यत्र स मारुतिः।
वहन् परमदुर्धर्षं स्थितमिन्द्रजितं रथे॥ **6.86.27**॥

सोऽभ्युपेत्य शरान् खड्गान् पट्टिशांश्च परश्वधान्।
अभ्यवर्षत दुर्धर्षः कपिमूर्धनि राक्षसः॥ **6.86.28**॥

तानि शस्त्राणि घोराणि प्रतिगृह्य स मारुतिः।
रोषेण महताविष्टो वाक्यं चेदमुवाच ह॥ **6.86.29**॥

युध्यस्व यदि शूरोऽसि रावणात्मज दुर्मते।
वायुपुत्रं समासाद्य न जीवन् प्रतियास्यसि॥ **6.86.30** ॥

बाहुभ्यां सम्प्रयुध्यस्व यदि मे द्वन्द्वमाहवे।
वेगं सहस्व दुर्बुद्धे ततस्त्वं रक्षसां वरः॥ **6.86.31** ॥

हनूमन्तं जिघांसन्तं समुद्यतशरासनम्।
रावणात्मजमाचष्टे लक्ष्मणाय विभीषणः॥ **6.86.32** ॥

यः स वासवनिर्जेता रावणस्यात्मसम्भवः।
स एष रथमास्थाय हनूमन्तं जिघांसति॥ **6.86.33** ॥

तमप्रतिमसंस्थानैः शरैः शत्रुनिवारणैः।
जीवितान्तकरैर्घोरैः सौमित्रे रावणिं जहि॥ **6.86.34** ॥

इत्येवमुक्तस्तु तदा महात्मा
विभीषणेनारिविभीषणेन।
ददर्श तं पर्वतसन्निकाशं
रथस्थितं भीमबलं नदन्तम्॥ **6.86.35** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडशीतितमः सर्गः॥